শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকৱিচন্দ্র ৱিনির্মিতা

# ॥ শ্রী কটাক্ষষোডশী ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী কটাক্ষষোডশী ॥

সংভাৱযন্ ৱিধিশিৱৌ সকৃদিন্দিরাযাঃ
ৱক্ত্রারৱিন্দপরিরম্ভকরঃ সুরস্পৃক্।
মজ্জন্ মুহুঃ স্বশরণেষু নিপত্য মগ্নো
দীনেষু রক্ষতু স মাং ভগৱৎকটাক্ষঃ ॥ **1** ॥

মজ্জন্ দযামযসুধাম্বুনিধৌ জগত্যা -
মত্যাদরেণ পরিরভ্য করীন্দ্রমার্তম্।
কুম্ভীরমাপ পরুষাকৃতিমেৱ রোষাৎ
যঃ পাতু জাতু ৱিশদো ভগৱৎকটাক্ষঃ ॥ **2** ॥

রক্তঃ স্বযং সলিলরাশিসুতাস্যবিম্ব -
সম্ভাৱনাসু শুচিরার্তজনপ্রসাদে।
অম্ভোজনিঃসরদলিপ্রকরানুকারী
চিত্রশ্চিরাদৱতু মাং ভগৱৎকটাক্ষঃ ॥ **3** ॥

দুঃখপ্রৱাহপরিণাহৱিগাহনোদ্য -
ৎসন্তাপমাদৃশৱিৱর্জনদুর্যশোভিঃ।
সংলিপ্তমূর্তিরিৱ মেচকরোচিরৱ্যা -
দৱ্যাজরক্ষিতজগদ্ভগৱৎকটাক্ষঃ ॥ **4** ॥

পদ্মালযাৱদনমণ্ডলনেত্রযুগ্ম -
চ্ছদ্মোল্লসদ্বিকচপদ্মৱিহারলুব্ধঃ।
মুগ্ধো মধুৱ্রতসমূহ ইৱ প্রসর্পন্
শ্রেযঃ সমর্পযতু মে ভগৱৎকটাক্ষঃ ॥ **5** ॥

পাতানুভাৱপরিপাৱিতপাতকাধ্ৱ -
পান্থাধিকাররহিতান্তকদর্শিতাধিঃ।
দুঃখাভিভূততরভূতচযানুভূতৌ
দাযস্তনোতু কুশলং ভগৱৎকটাক্ষঃ ॥ **6** ॥

মন্দারমুখ্যসুরৱৃক্ষৱদান্যভাৱঃ
সন্ধ্যাস্ফুটীকৃতবহুপ্রৱণার্থিৱন্দ্যঃ।
নিষ্কামভক্তজনসাৎকৃতনিত্যধামা
কামায সংভৱতু মে ভগৱৎকটাক্ষঃ ॥ **7** ॥

ন্যস্তাত্মভারভরণাদরভাৱ্যমান -
ৱৃত্তিপ্রৱৃত্তিপরতন্ত্র ইৱ প্রৱৃত্তিঃ।
সদ্বৃত্তিধূর্তৱিষযাধিকতোষরোষ -
সংলক্ষিতো ভগৱতোঽৱতু মাং কটাক্ষঃ ॥ **8** ॥

দুর্ৱারমারশরৱার ইৱাতিধীর -
ৱারাঙ্গনাহৃদযদুর্জযধৈর্যভেদী।
সৎপক্ষযোগৱিহিতদ্রুতগত্যনিন্দ্যো
নিন্দ্যাং মতিং হরতু মে স হরেঃ কটাক্ষঃ ॥ **9** ॥

নির্ৱ্যাজদৃষ্টিকরুণামৃতৱৃষ্টিহৃষ্ট -
পুষ্টত্রিলোকগতকোকৱিলোকনীযঃ।
দিৱ্যাম্বুৱাহ ইৱ সক্ষণরুগ্ৱিলাসঃ
তাপত্রযং হরতু মে স হরেঃ কটাক্ষঃ ॥ **10** ॥

যস্মিন্ সমুল্লসতি কামধুগল্পদো ৱা
কল্পদ্রুরল্পফলপুষ্প ইৱাস্তু কল্পঃ।
চিন্তামণির্মণিগণৈর্গণনীযভাগ্যঃ
কামং স পূরযতু মে ভগৱৎকটাক্ষঃ ॥ **11** ॥

অন্তর্নিরন্তরৱলদ্বিমলানুকম্পা -
সংস্পর্ধমানমহিমানগৃহীতভক্তঃ।
অগ্রাধ্ৱজাগ্রদতিৱেলসত্তিতিক্ষঃ
ক্ষেমং তনোতু নিতরাং ভগৱৎকটাক্ষঃ॥ **12**॥

ইন্দীৱরোদরমনোহরমন্দিরান্ত -
ৰ্ৱাস্তৱ্যকান্তিরমণীপরিরভ্যমাণঃ।
কশ্চিদ্বিপশ্চিদনুভূতমহাপ্রসাদঃ
সীদন্তমুদ্ধরতু মাং ভগৱৎকটাক্ষঃ॥ **13**॥

ধ্যায়ন্নিকায়নিরপায়কৃপৌঘযুক্তো
মুক্তোপভুক্তমহিমামৃতসিন্ধুবিন্দুঃ।
কামপ্রকামফলদাননিদানকল্প -
ৱৃক্ষোপমঃ ফলতু মে ভগৱৎকটাক্ষঃ॥ **14**॥

যস্যানুকূল্যবহুমূল্যমনোজ্ঞরত্ন -
ভূষাৱিভূষিততনুস্তনুজাম্বুরাশেঃ।
ভূরপ্যভূদতুলসৌভগযোগযোগ্যা
ভূয়াৎ স ভূরিৱিভৱায় ৱিভোঃ কটাক্ষঃ॥ **15**॥

ইন্দীৱরৈরিৱ কিরন্ রুচিভিঃ সমন্তাৎ
বৃন্দাৱনান্তরমনন্তগুণাস্পদং যঃ।
আনন্দযত্যনুদিনং ৱ্রজসুন্দরীণাং
চেতাংসি মেঽস্তু সুখদঃ স হরেঃ কটাক্ষঃ॥ **16**॥

কটাক্ষষোডশী সেযং কৱিচন্দ্রৱিনির্মিতা।
কলেৱ কৃষ্ণচন্দ্রস্য করোতু জগতাং মুদম্॥ **17**॥

॥ ইতি শ্রী কটাক্ষষোডশী সমাপ্তা॥